# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्
## सत्रान्तपरीक्षा – एप्रिल – २०१९

| | | |
|---|---|---|
| **कक्षा –** शास्त्रिद्वितीयवर्षम् (SEM-4) | **प्रश्नपत्रम् –** ०७ | **गुणा: -** ७० |
| **विषय: -** साहित्यम् | **कोड – C.E. 2.4.4** | **समय: -** ०३ त: ०६ |
| **दिनाङ्क: -** ०५/०४/२०१९ | **सन्दर्भग्रन्थ: –** दशरूपकम् (३-४ प्रकाशौ) **(NEW)** | |

### प्रथमान्वितिः (Unit-1)

**प्रश्नः – १ कयोश्चिद् द्वयो: ससन्दर्भव्याख्यां कुरुत।** १०

१.पूर्वरङ्गं विधायादौ सूत्रधारे विनिर्गते।
प्रविश्य तद्वदपर: काव्यार्थंस्थापयेन्नट:॥

२. भारती संस्कृतप्रायो वाग्व्यापारो नटाश्रय:।
भेदै: प्ररोचनायुक्तै-र्वीथी प्रहसनामुखै:॥

३.विरुद्धं तत्परित्याज्यमन्यथा वा प्रकल्पयेत्।
आद्यान्तमेव निश्चित्य पञ्चधा तद्विभज्य च॥

प्रश्नः – २ कस्याप्येकस्य उत्तरं लिखत। १०

१. भारतीवृत्ते: लक्षणं प्रतिपाद्य सोदाहरणं तद्भेदा: प्रतिपादनीया:।

(अथवा)

२. भाणलक्षणं सोदाहरणं प्रतिपाद्य तस्याङ्गानि निरूपणीयानि ।

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः – ३ कयोश्चिद् द्वयो: ससन्दर्भप्रसङ्गं व्याख्यां कार्या।** १०

(१)चतुरङ्कश्चतुस्सन्धिर्निर्विमर्शो डिम: स्मृत:।
ख्यातेतिवृत्तो व्यायोग: ख्यातोद्धतनराश्रय:॥

(२) ज्ञायमानतया तत्र विभावो भावपोषकृत्।
आलम्बनोद्दीपनत्व – प्रभेदेन स च द्विधा॥

(३) गर्वोऽभिजनलावण्य बलैश्वर्यादिभिर्मद:।
कर्माण्याघर्षणावज्ञा सविलासाङ्गवीक्षणम्॥

**प्रश्नः – ४ कस्याप्येकस्य सविस्तरम् उत्तरं यच्छत।** १०

१. सोदाहरणं व्यायोगस्य स्वरूपं प्रतिपाद्यताम् ।

**(अथवा)**

२. रसस्वरूपं दशरूपकदिशा प्रतिपाद्यताम्।

## तृतीयान्विति:(Unit - 3)

**प्रश्नः –५ कयोश्चित् द्वयो: ससन्दर्भव्याख्यां कुरुत ।** १०

१) रत्युत्साहजुगुप्सा: क्रोधो हास: स्मयो भयं शोक: ।
शममपि केचित्प्राहु: पुष्टिर्नाट्येषु नैतस्य ॥

२) रस: स एव स्वाद्यत्वद्ररसिकस्यैव वर्तनात् ।
नानुकार्यस्य वृत्तत्वात्काव्यस्यातत्परन्त्वत: ॥

३) पदार्थैरिन्दुनिर्वेदरोमाञ्चादिस्वरूपकै: ।
काव्याद्विभावसञ्चार्यनुभावप्रख्यतां गतै: ॥

प्रश्नः –६ कस्याप्येकस्य उतरं लिखत । १०

१. सोदाहरणमनुभावस्वरूपं विवेचनीयम् ।

(अथवा)

२. दशरूपकदिशा स्थायिभावानां विवेचनं क्रियताम् ।

## अन्वितय: १ – ३ (Units 1 – 3)

**प्रश्नः –७ अधोलिखितेषु प्रश्नेषु दशानां प्रश्नानां लघूत्तरं लिखत ।** १०

१) भारतीवृत्ते: कति भेदा: सन्ति ?

२) किं नाम प्ररोचना ?

३) तृतीयप्रकाशे कति कारिका: ?

४) आमुखस्य कति अङ्गानि ?

५) प्रकरणस्य कति भेदा: ?

६) चतुर्थप्रकाशे कति कारिका: ?

७) विभाव: नाम किम् ?

८) रसस्वरूपं लिखत ।

९) प्रकरणस्य किं लक्षणम् ?

१०) प्रहसनस्य किं लक्षणम् ?

११) स्थायिभावा: कति ?

१२) श्रृङ्गाररसस्य कति भेदा: भवन्ति ?

१३) सम्भोगश्रृङ्गाररसस्य स्वरूपं किम् ?

१४) दशरूपक: कति प्रकाशे विभक्त: ?

१५) वीररसस्य कति प्रकारा:?

*****************